मृत्युञ्जयसहस्रनामस्तोत्रम्

{॥ मृत्युञ्जयसहस्रनामस्तोत्रम् ॥}

श्रीगणेशाय नमः ।

श्रीभैरव उवाच ।

अधुना शृणु देवेशि सहस्राख्यस्तवोत्तमम् ।

महामृत्युञ्जयस्यास्य सारात् सारोत्तमोत्तमम् ॥

अस्य श्रीमहामृत्युञ्जसहस्रनामस्तोत्र मन्त्रस्य,

भैरव ऋषिः, उष्णिक् छन्दः, श्रीमहामृत्युञ्जयो देवता,

ॐ बीजं, जुं शक्तिः, सः कीलकं, पुरुषार्थसिद्धये

सहस्रनाम पाठे विनियोगः ।

ध्यानम्

उद्यच्चन्द्रसमानदीप्तिममृतानन्दैकहेतुं शिवं

ॐजुंसःभुवनैकसृष्टिप्रलयोद्भूत्येकरक्षाकरम् ।

श्रीमत्तारदशार्णमण्डिततनुं त्र्यक्षं द्विबाहुं परं

श्रीमृत्युञ्जयमीड्यविक्रमगुणैः पूर्णं हृदब्जे भजे ॥

ॐजुंसःहौं महादेवो मन्त्रज्ञो मानदायकः ।

मानी मनोरमाङ्गश्च मनस्वी मानवर्धनः ॥ १॥

मायाकर्ता मल्लरूपो मल्लो मारान्तको मुनिः ।

महेश्वरो महामान्यो मन्त्री मन्त्रिजनप्रियः ॥ २॥

मारुतो मरुतां श्रेष्ठो मासिकः पक्षिकोऽमृतः ।

मातङ्गको मत्तचित्तो मतचिन्मत्तभावनः ॥ ३॥

मानवेष्टप्रदो मेषो मेनकापतिवल्लभः ।

मानकायो मधुस्तेयी मारयुक्तो जितेन्द्रियः ॥ ४॥

जयो विजयदो जेता जयेशो जयवल्लभः ।

डामरेशो विरूपाक्षो विश्वभोक्ता विभावसुः ॥ ५॥

विश्वेशो विश्वनाथश्च विश्वसूर्विश्वनायकः ।

विनेता विनयी वादी वान्तदो वाक्प्रदो वटुः ॥ ६॥

स्थूलः सूक्ष्मोऽचलो लोलो लोलजिह्वः करालकः ।

विराधेयो विरागीनो विलासी लास्यलालसः ॥ ७॥

लोलाक्षो लोलधीर्धर्मी धनदो धनदार्चितः ।

धनी ध्येयोऽप्यध्येयश्च धर्म्यो धर्ममयो दयः ॥ ८॥

दयावान् देवजनको देवसेव्यो दयापतिः ।

डुलिचक्षुर्दरीवासो दम्भी देवमयात्मकः ॥ ९॥

कुरूपः कीर्तिदः कान्तः क्लीवोऽक्लीवात्मकः कुजः ।

बुधो विद्यामयः कामी कामकालान्धकान्तकः ॥ १०॥

जीवो जीवप्रदः शुक्रः शुद्धः शर्मप्रदोऽनघः ।

शनैश्चरो वेगगतिर्वाचालो राहुरव्ययः ॥ ११॥

केतुः कारापतिः कालः सूर्योऽमितपराक्रमः ।

चन्द्रो रुद्रपतिः भास्वान् भाग्यदो भर्गरूपभृत् ॥ १२॥

क्रूरो धूर्तो वियोगी च सङ्गी गङ्गाधरो गजः ।

गजाननप्रियो गीतो गानी स्नानार्चनप्रियः ॥ १३॥

परमः पीवराङ्गश्च पार्वतीवल्लभो महान् ।

परात्मको विराड्धौम्यः वानरोऽमितकर्मकृत् ॥ १४॥

चिदानन्दी चारुरूपो गारुडो गरुडप्रियः ।

नन्दीश्वरो नयो नागो नागालङ्कारमण्डितः ॥ १५॥

नागहारो महानागो गोधरो गोपतिस्तपः ।

त्रिलोचनस्त्रिलोकेशस्त्रिमूर्तिस्त्रिपुरान्तकः ॥ १६॥

त्रिधामयो लोकमयो लोकैकव्यसनापहः ।

व्यसनी तोषितः शम्भुस्त्रिधारूपस्त्रिवर्णभाक् ॥ १७॥

त्रिज्योतिस्त्रिपुरीनाथस्त्रिधाशान्तस्त्रिधागतिः ।

त्रिधागुणी विश्वकर्ता विश्वभर्ताऽऽधिपूरुषः ॥ १८॥

उमेशो वासुकिर्वीरो वैनतेयो विचारकृत् ।

विवेकाक्षो विशालाक्षोऽविधिर्विधिरनुत्तमः ॥ १९॥

विद्यानिधिः सरोजाक्षो निःस्मरः स्मरनाशनः ।

स्मृतिमान् स्मृतिदः स्मार्तो ब्रह्मा ब्रह्मविदां वरः ॥ २०॥

ब्राह्मव्रती ब्रह्मचारी चतुरश्चतुराननः ।

चलाचलोऽचलगतिर्वेगी वीराधिपो वरः ॥ २१॥

सर्ववामः सर्वगतिः सर्वमान्यः सनातनः ।

सर्वव्यापी सर्वरूपः सागरश्च समेश्वरः ॥ २२॥

समनेत्रः समद्युतिः समकायः सरोवरः ।

सरस्वान् सत्यवाक् सत्यः सत्यरूपः सुधीः सुखी ॥ २३॥

सुराट् सत्यः सत्यमती रुद्रो रौद्रवपुर्वसुः ।

वसुमान् वसुधानाथो वसुरूपो वसुप्रदः ॥ २४॥

ईशानः सर्वदेवानामीशानः सर्वबोधिनाम् ।

ईशोऽवशेषोऽवयवी शेषशायी श्रियः पतिः ॥ २५॥

इन्द्रश्चन्द्रावतंसी च चराचरजगत्स्थितिः ।

स्थिरः स्थाणुरणुः पीनः पीनवक्षाः परात्परः ॥ २६॥

पीनरूपो जटाधारी जटाजूटसमाकुलः ।

पशुरूपः पशुपतिः पशुज्ञानी पयोनिधिः ॥ २७॥

वेद्यो वैद्यो वेदमयो विधिज्ञो विधिमान् मृडः ।

शूली शुभङ्करः शोभ्यः शुभकर्ता शचीपतिः ॥ २८॥

शशाङ्कधवलः स्वामी वज्री शङ्खी गदाधरः ।

चतुर्भुजश्चाष्टभुजः सहस्रभुजमण्डितः ॥ २९॥

स्रुवहस्तो दीर्घकेशो दीर्घो दम्भविवर्जितः ।

देवो महोदधिर्दिव्यो दिव्यकीर्तिर्दिवाकरः ॥ ३०॥

उग्ररूप उग्रपतिरुग्रवक्षास्तपोमयः ।

तपस्वी जटिलस्तापी तापहा तापवर्जितः ॥ ३१॥

हविर्हरो हयपतिर्हयदो हरिमण्डितः ।

हरिवाही महौजस्को नित्यो नित्यात्मकोऽनलः ॥ ३२॥

सम्मानी संसृतिर्हारी सर्गी सन्निधिरन्वयः ।

विद्याधरो विमानी च वैमानिकवरप्रदः ॥ ३३॥

वाचस्पतिर्वसासारो वामाचारी बलन्धरः ।

वाग्भवो वासवो वायुर्वासनाबीजमण्डितः ॥ ३४॥

वासी कोलश्रृतिर्दक्षो दक्षयज्ञविनाशनः ।

दाक्षो दौर्भाग्यहा दैत्यमर्दनो भोगवर्धनः ॥ ३५॥

भोगी रोगहरो हेयो हारी हरिविभूषणः ।

बहुरूपो बहुमतिर्बहुवित्तो विचक्षणः ॥ ३६॥

नृत्तकृच्चित्तसन्तोषो नृत्तगीतविशारदः ।

शरद्वर्णविभूषाढ्यो गलदग्धोऽघनाशनः ॥ ३७॥

नागी नागमयोऽनन्तोऽनन्तरूपः पिनाकभृतः ।

नटनो हाटकेशानो वरीयांश्च विवर्णभृत् ॥ ३८॥

झाङ्कारी टङ्कहस्तश्च पाशी शाङ्गी शशिप्रभः ।

सहस्ररूपो समगुः साधूनामभयप्रदः ॥ ३९॥

साधुसेव्यः साधुगतिः सेवाफलप्रदो विभुः ।

सुमहा मद्यपो मत्तो मत्तमूर्तिः सुमन्तकः ॥ ४०॥

कीली लीलाकरो लान्तः भवबन्धैकमोचनः ।

रोचिष्णुर्विष्णुरच्युतश्चूतनो नूतनो नवः ॥ ४१॥

न्यग्रोधरूपो भयदो भयहाऽभीतिधारणः ।

धरणीधरसेव्यश्च धराधरसुतापतिः ॥ ४२॥

धराधरोऽन्धकरिपुर्विज्ञानी मोहवर्जितः ।

स्थाणुकेशो जटी ग्राम्यो ग्रामारामो रमाप्रियः ॥ ४३॥

प्रियकृत् प्रियरूपश्च विप्रयोगी प्रतापनः ।

प्रभाकरः प्रभादीप्तो मन्युमान् अवनीश्वरः ॥ ४४॥

तीक्ष्णबाहुस्तीक्ष्णकरस्तीक्ष्णांशुस्तीक्ष्णलोचनः ।

तीक्ष्णचित्तस्त्रयीरूपस्त्रयीमूर्तिस्त्रयीतनुः ॥ ४५॥

हविर्भुग् हविषां ज्योतिर्हालाहलो हलीपतिः ।

हविष्मल्लोचनो हालामयो हरितरूपभृत् ॥ ४६॥

म्रदिमाऽऽम्रमयो वृक्षो हुताशो हुतभुग् गुणी ।

गुणज्ञो गरुडो गानतत्परो विक्रमी क्रमी ॥ ४७॥

क्रमेश्वरः क्रमकरः क्रमिकृत् क्लान्तमानसः ।

महातेजा महामारो मोहितो मोहवल्लभः ॥ ४८॥

महस्वी त्रिदशो बालो बालापतिरघापहः ।

बाल्यो रिपुहरो हाही गोविर्गविमतोऽगुणः ॥ ४९॥

सगुणो वित्तराड् वीर्यो विरोचनो विभावसुः ।

मालामयो माधवश्च विकर्तनो विकत्थनः ॥ ५०॥

मानकृन्मुक्तिदोऽतुल्यो मुख्यः शत्रुभयङ्करः ।

हिरण्यरेताः सुभगः सतीनाथः सिरापतिः ॥ ५१॥

मेद्री मैनाकभगिनीपतिरुत्तमरूपभृत् ।

आदित्यो दितिजेशानो दितिपुत्रक्षयङ्करः ॥ ५२॥

वसुदेवो महाभाग्यो विश्वावसुर्वसुप्रियः ।

समुद्रोऽमिततेजाश्च खगेन्द्रो विशिखी शिखी ॥ ५३॥

गरुत्मान् वज्रहस्तश्च पौलोमीनाथ ईश्वरः ।

यज्ञपेयो वाजपेयः शतक्रतुः शताननः ॥ ५४॥

प्रतिष्ठस्तीव्रविस्रम्भी गम्भीरो भाववर्धनः ।

गायिष्ठो मधुरालापो मधुमत्तश्च माधवः ॥ ५५॥

मायात्मा भोगिनां त्राता नाकिनामिष्टदायकः ।

नाकीन्द्रो जनको जन्यः स्तम्भनो रम्भनाशनः ॥ ५६॥

शङ्कर ईश्वर ईशः शर्वरीपतिशेखरः ।

लिङ्गाध्यक्षः सुराध्यक्षो वेदाध्यक्षो विचारकः ॥ ५७॥

भर्गोऽनर्घ्यो नरेशानो नरवाहनसेवितः ।

चतुरो भविता भावी भावदो भवभीतिहा ॥ ५८॥

भूतेशो महितो रामो विरामो रात्रिवल्लभः ।

मङ्गलो धरणीपुत्रो धन्यो बुद्धिविवर्धनः ॥ ५९॥

जयी जीवेश्वरो जारो जाठरो जह्नुतापनः ।

जह्नुकन्याधरः कल्पो वत्सरो मासरूपधृत् ॥ ६०॥

ऋतुरृभूसुताध्यक्षो विहारी विहगाधिपः ।

शुक्लाम्बरो नीलकण्ठः शुक्लो भृगुसुतो भगः ॥ ६१॥

शान्तः शिवप्रदोऽभेद्योऽभेदकृच्छान्तकृत् पतिः ।

नाथो दान्तो भिक्षुरूपी दातृश्रेष्ठो विशाम्पतिः ॥ ६२॥

कुमारः क्रोधनः क्रोधी विरोधी विग्रही रसः ।

नीरसः सरसः सिद्धो वृषणी वृषघातनः ॥ ६३॥

पञ्चास्यः षण्मुखश्चैव विमुखः सुमुखीप्रियः ।

दुर्मुखो दुर्जयो दुःखी सुखी सुखविलासदः ॥ ६४॥

पात्री पौत्री पवित्रश्च भूतात्मा पूतनान्तकः ।

अक्षरं परमं तत्वं बलवान् बलघातनः ॥ ६५॥

भल्ली भौलिर्भवाभावो भावाभावविमोचनः ।

नारायणो मुक्तकेशो दिग्देवो धर्मनायकः ॥ ६६॥

कारामोक्षप्रदोऽजेयो महाङ्गः सामगायनः ।

तत्सङ्गमो नामकारी चारी स्मरनिसूदनः ॥ ६७॥

कृष्णः कृष्णाम्बरः स्तुत्यस्तारावर्णस्त्रपाकुलः ।

त्रपावान् दुर्गतित्राता दुर्गमो दुर्गघातनः ॥ ६८॥

महापादो विपादश्च विपदं नाशको नरः ।

महाबाहुर्महोरस्को महानन्दप्रदायकः ॥ ६९॥

महानेत्रो महादाता नानाशास्त्रविचक्षणः ।

महामूर्धा महादन्तो महाकर्णो महोरगः ॥ ७०॥

महाचक्षुर्महानासो महाग्रीवो दिगालयः ।

दिग्वासा दितिजेशानो मुण्डी मुण्डाक्षसूत्र भृत् ॥ ७१॥

श्मशाननिलयोऽरागी महाकटिरनूतनः ।

पुराणपुरुषोऽपारः परमात्मा महाकरः ॥ ७२॥

महालस्यो महाकेशो महोष्ठो मोहनो विराट् ।

महामुखो महाजङ्घो मण्डली कुण्डली नटः ॥ ७३॥

असपत्नः पत्रकरः पात्रहस्तश्च पाटवः ।

लालसः सालसः सालः कल्पवृक्षश्च कम्पितः ॥ ७४॥

कम्पहा कल्पनाहारी महाकेतुः कठोरकः ।

अनलः पवनः पाठः पीठस्थः पीठरूपकः ॥ ७५॥

पाटीनः कुलिशी पीनो मेरुधामा महागुणी ।

महातूणीरसंयुक्तो देवदानवदर्पहा ॥ ७६॥

अथर्वशीर्षः सोम्यास्यः ऋक्सहस्रामितेक्षणः ।

यजुःसाममुखो गुह्यो यजुर्वेदविचक्षणः ॥ ७७॥

याज्ञिको यज्ञरूपश्च यज्ञज्ञो धरणीपतिः ।

जङ्गमी भङ्गदो भाषादक्षोऽभिगमदर्शनः ॥ ७८॥

अगम्यः सुगमः खर्वः खेटी खट्वाननः नयः ।

अमोघार्थः सिन्धुपतिः सैन्धवः सानुमध्यगः ॥ ७९॥

प्रतापी प्रजयी प्रातर्मध्याह्नसायमध्वरः ।

त्रिकालज्ञः सुगणकः पुष्करस्थः परोपकृत् ॥ ८०॥

उपकर्तापहर्ता च घृणी रणजयप्रदः ।

धर्मी चर्माम्बरश्चारुरूपश्चारुविशोषणः ॥ ८१॥

नक्तञ्चरःकालवशी वशी वशिवरोऽवशः ।

वश्यो वश्यकरो भस्मशायी भस्मविलेपनः ॥ ८२॥

भस्माङ्गी मलिनाङ्गश्च मालामण्डितमूर्धजः ।

गणकार्यः कुलाचारः सर्वाचारः सखा समः ॥ ८३॥

सुकुरः गोत्रभिद् गोप्ता भीमरूपो भयानकः ।

अरुणश्चैकचिन्त्यश्च त्रिशङ्कुः शङ्कुधारणः ॥ ८४॥

आश्रमी ब्राह्मणो वज्री क्षत्रियः कार्यहेतुकः ।

वैश्यः शूद्रः कपोतस्थः त्वष्टा तुष्टो रुषाकुलः ॥ ८५॥

रोगी रोगापहः शूरः कपिलः कपिनायकः ।

पिनाकी चाष्टमूर्तिश्च क्षितिमान् धृतिमांस्तथा ॥ ८६॥

जलमूर्तिर्वायुमूर्तिर्हुताशः सोममूर्तिमान् ।

सूर्यदेवो यजमान आकाशः परमेश्वरः ॥ ८७॥

भवहा भवमूर्तिश्च भूतात्मा भूतभावनः ।

भवः शर्वस्तथा रुद्रः पशुनाथश्च शङ्करः ॥ ८८॥

गिरिजो गिरिजानाथो गिरीन्द्रश्च महेश्वरः ।

गिरीशः खण्डहस्तश्च महानुग्रो गणेश्वरः ॥ ८९॥

भीमः कपर्दी भीतिज्ञः खण्डपश्चण्डविक्रमः ।

खड्गभृत् खण्डपरशुः कृत्तिवासा विषापहः ॥ ९०॥

कङ्कालः कलनाकारः श्रीकण्ठो नीललोहितः ।

गणेश्वरो गुणी नन्दी धर्मराजो दुरन्तकः ॥ ९१॥

भृङ्गिरीटी रसासारो दयालू रूपमण्डितः ।

अमृतः कालरुद्रश्च कालाग्निः शशिशेखरः ॥ ९२॥

सद्योजातः सुवर्णमुञ्जमेखली दुर्निमित्तहृत् ।

दुःस्वप्नहृत् प्रसहनो गुणिनादप्रतिष्ठितः ॥ ९३॥

शुक्लस्त्रिशुक्लः सम्पन्नः शुचिर्भूतनिषेवितः ।

यज्ञरूपो यज्ञमुखो यजमानेष्टदः शुचिः ॥ ९४॥

धृतिमान् मतिमान् दक्षो दक्षयज्ञविघातकः ।

नागहारी भस्मधारी भूतिभूषितविग्रहः ॥ ९५॥

कपाली कुण्डली भर्गः भक्तार्तिभञ्जनो विभुः ।

वृषध्वजो वृषारूढो धर्मवृषविवर्धकः ॥ ९६॥

महाबलः सर्वतीर्थः सर्वलक्षणलक्षितः ।

सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ॥ ९७॥

पवित्रस्त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ।

ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ॥ ९८॥

पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ।

देवासुरविनिर्माता देवासुरपरायण ॥ ९९॥

देवासुरगुरुर्देवो देवासुरनमस्कृत् ।

गुहप्रियो गणसेव्यः पवित्रः सर्वपावनः ॥ १००॥

ललाटाक्षो विश्वदेवो दमनः श्वेतपिङ्गलः ।

विमुक्तिर्मुक्तितेजस्को भक्तानां परमा गतिः ॥ १०१॥

देवातिदेवो देवर्षिर्देवासुरवरप्रदः ।

कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ॥ १०२॥

नाथपूज्यः सिद्धनृत्यो नवनाथसमर्चितः ।

कपर्दी कल्पकृद् रुद्रः सुमना धर्मवत्सलः ॥ १०३॥

वृषाकपिः कल्पकर्ता नियतात्मा निराकुलः ।

नीलकण्ठो धनाध्यक्षो नाथः प्रमथनायकः ॥ १०४॥

अनादिरन्तरहितो भूतिदो भूतिविग्रहः ।

सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥ १०५॥

युगरूपो महारूपो महागीतो महागुणः ।

विसर्गो लिङ्गरूपश्च पवित्रः पापनाशनः ॥ १०६॥

ईड्यो महेश्वरः शम्भुर्देवसिंहो नरर्षभः ।

विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ॥ १०७॥

सुयुक्तः शोभनो वज्री देवानां प्रभवोऽव्ययः ।

गुहः कान्तो निजसर्गः पवित्रः सर्वपावनः ॥ १०८॥

शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः ।

देवासुरगणाध्यक्षो नियमेन्द्रियवर्धनः ॥ १०९॥

त्रिपुरान्तकः श्रीकण्ठस्त्रिनेत्रः पञ्चवक्त्रकः ।

कालहृत् केवलात्मा च ऋग्यजुःसामवेदवान् ॥ ११०॥

ईशानः सर्वभूतामीश्वरः सर्वरक्षसाम् ।

ब्रह्माधिपतिर्ब्रह्मपतिर्ब्रह्मणोऽधिपतिस्तथा ॥ १११॥

ब्रह्मा शिवः सदानन्दी सदानन्तः सदाशिवः ।

मे-अस्तुरूपश्चार्वङ्गो गायत्रीरूपधारणः ॥ ११२॥

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यश्च ।

सर्वतः शर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥ ११३॥

वामदेवस्तथा ज्येष्ठः श्रेष्ठः कालः करालकः ।

महाकालो भैरवेशो वेशी कलविकरणः ॥ ११४॥

बलविकरणो बालो बलप्रमथनस्तथा ।

सर्वभूतादिदमनो देवदेवो मनोन्मनः ॥ ११५॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।

भवे भवे नातिभवे भजस्व मां भवोद्भवः ॥ ११६॥

भावनो भवनो भाव्यो बलकारी परं पदम् ।

परः शिवः परो ध्येयः परं ज्ञानं परात्परः ॥११७॥

पारावारः पलाशी च मांसाशी वैष्णवोत्तमः ।

ॐऐंह्रींश्रींह्सौः देवो ॐश्रींहौं भैरवोत्तमः ॥ ११८॥

ॐह्रां नमः शिवायेति मन्त्रो वटुर्वरायुधः ।

ॐह्रीं सदाशिवः ॐह्रीं आपदुद्धारणो मनुः ॥ ११९॥

ॐह्रीं महाकरालास्यः ॐह्रीं बटुकभैरवः ।

भगवांस्त्र्यम्बक ॐह्रीं ॐह्रीं चन्द्रार्धशेखरः ॥ १२०॥

ॐह्रीं सञ्जटिलो धूम्रो ॐह्रीं त्रिपुरघातनः ।

ह्रांह्रींह्रुं हरिवामाङ्ग ॐह्रींह्रूंह्रीं त्रिलोचनः ॥ १२१॥

ॐ वेदरूपो वेदज्ञ ऋग्यजुःसाममूर्तिमान् ।

रुद्रो घोररवोऽघोरो ॐ क्ष्म्यूं अघोरभैरवः ॥ १२२॥

ॐजुंसः पीयुषसक्तोऽमृताध्यक्षोऽमृतालसः ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ॥ १२३॥

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।

ॐहौंजुंसः ॐभूर्भुवः स्वः ॐजुंसः मृत्युञ्जयः ॥ १२४॥

इदं नाम्नां सहस्रं तु रहस्यं परमाद्भुतम् ।

सर्वस्वं नाकिनां देवि जन्तूनां भुवि का कथा ॥ १२५॥

तव भक्त्या मयाख्यातं त्रिषु लोकेषु दुर्लभम् ।

गोप्यं सहस्रनामेदं साक्षादमृतरूपकम् ॥ १२६॥

यः पठेत् पाठयेद्वापि श्रावयेच्छृणुयात् तथा ।

मृत्युञ्जयस्य देवस्य फलं तस्य शिवे श्रृणु ॥ १२७॥

लक्ष्म्या कृष्णो धिया जीवो प्रतापेन दिवाकरः ।

तेजसा वह्निदेवस्तु कवित्वे चैव भार्गवः ॥ १२८॥

शौर्येण हरिसङ्काशो नीत्या द्रुहिणसन्निभः ।

ईश्वरत्वेन देवेशि मत्समः किमतः परम् ॥ १२९॥

यः पठेदर्धरात्रे च साधको धैर्यसंयुतः ।

पठेत् सहस्रनामेदं सिद्धिमाप्नोति साधकः ॥ १३०॥

चतुष्पथे चैकलिङ्गे मरुदेशे वनेऽजने ।

श्मशाने प्रान्तरे दुर्गे पाठात् सिद्धिर्न संशयः ॥ १३१॥

नौकायां चौरसङ्घे च सङ्कटे प्राणसंक्षये ।

यत्र यत्र भये प्राप्ते विषवह्निभयादिषु ॥ १३२॥

पठेत् सहस्रनामाशु मुच्यते नात्र संशयः ।

भौमावस्यां निशीथे च गत्वा प्रेतालयं सुधीः ॥ १३३॥

पठित्वा स भवेद् देवि साक्षादिन्द्रोऽर्चितः सुरैः ।

शनौ दर्शदिने देवि निशायां सरितस्तटे ॥ १३४॥

पठेन्नामसहस्रं वै जपेदष्टोत्तरं शतम् ।

सुदर्शनो भवेदाशु मृत्युञ्जयप्रसादतः ॥ १३५॥

दिगम्बरो मुक्तकेशः साधको दशधा पठेत् ।

इह लोके भवेद्राजा परे मुक्तिर्भविष्यति ॥ १३६॥

इदं रहस्यं परमं भक्त्या तव मयोदितम् ।

मन्त्रगर्भं मनुमयं न चाख्येयं दुरात्मने ॥ १३७॥

नो दद्यात् परशिष्येभ्यः पुत्रेभ्योऽपि विशेषतः ।

रहस्यं मम सर्वस्वं गोप्यं गुप्ततरं कलौ ॥ १३८॥

षण्मुखस्यापि नो वाच्यं गोपनीयं तथात्मनः ।

दुर्जनाद् रक्षणीयं च पठनीयमहर्निशम् ॥ १३९॥

श्रोतव्यं साधकमुखाद्रक्षणीयं स्वपुत्रवत् ।

॥ इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये

मृत्युञ्जयसहस्रनामं सम्पूर्णम् ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Mrutyunjaya Sahasranama Stotram Lyrics in Devanagari PDF
% File name : mRityunjayasahasra.itx
% Category : sahasranAma
% Location : doc_shiva

% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : rudrayAmale tantre devIrahasye
% Latest update : January 24, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website